श्री सुब्रह्मण्य मानसपूजा स्तोत्रं

श्री सुब्रह्मण्य मानसपूजा स्तोत्रं

श्रीमन्मेरुधराधराधिप महासौभाग्यसंशोभिते
मंदारद्रुमवाटिकापरिवृते श्रीस्कंदशैलेमले
सौधे हाटकनिर्मिते मणिमये सन्मंटपाभ्यंतरे
ब्रह्मानंदघनं गुहाख्यमनघं सिंहासनं चिंतये || 1 ||

मदनायुतलावण्यं नव्यारुणशतारुणं |
नीलजीमूतचिकुरं अर्धेंदु सदृशालिकं || 2 ||

पुंडरीकविशालाक्षं पूर्णचंद्रनिभाननं |
चांपेय विलसन्नासं मंदहासांचितोरसं || 3 ||

गंडस्थलचलच्छोत्र कुंडलं चारुकंधरं |
करासक्तकनःदंडं रत्नहारांचितोरसं || 4 ||

कटीतटलसद्दिव्यवसनं पीवरोरुकं |
सुरासुरादिकोटीर नीराजितपदांबुजं || 5 ||

नानारत्न विभूषाढ्यं दिव्यचंदनचर्चितं |
सनकादि महायोगि सेवितं करुणानिधिं || 6 ||

भक्तवांछितदातारं देवसेनासमावृतं |
तेजोमयं कार्तिकेयं भावये हृदयांबुजे || 7 ||

आवाहयामि विश्वेशं महासेनं महेश्वरं |
तेजस्त्रयात्मकं पीठं शरजन्मन् गृहाण भोः || 8 ||

अनवद्यं गृहाणेश पाद्यमद्य षडानन |
पार्वतीनंदनानर्घ्यं अर्पयाम्यर्घ्यमद्भुतं || 9 ||

आचम्यतामग्निजात स्वर्णपात्रोद्यतैर्जलैः |
पंचामृतरसैर्दिव्यैः सुधासमविभावितैः || 10 ||

दधिक्षीराज्यमधुभिः पंचगव्यैः फलोदकैः |
नानाफलरसैर्दिव्यैर्नारिकेळफलोदकैः || 11 ||

दिव्यौषधिरसैः स्वर्णरत्नोदक कुशोदकैः |
हिमांबुचंदनरसैर्घनसारादिवासितैः || 12 ||

ब्रह्मांडोदरमध्यस्थ तीर्थैः परमपावनैः |
पावनं परमेशान त्वां तीर्थैः स्नापयाम्यहं || 13 ||

सुधोर्मिक्षीरधवळं भस्मनोधूळ्यतावकं |
सौवर्णवाससाकायां वेष्टयेऽभीष्टसिद्धये || 14 ||

यज्ञोपवीतं सुज्ञानदायिने तेऽर्पये गुहं |
किरीटहारकेयूर भूषणानि समर्पये || 15 ||

रोचनागरुकस्तूरी सिताभ्रमसृणान्वितं |
गंधसारं सुरभिलं सुरेशाभ्युपगम्यतां || 16 ||

रचये तिलकं फाले गंधं मृगमदेन ते |
अक्षय्यफलदानर्घानक्षतानर्पये प्रभो || 17 ||

कुमुदोत्पल कह्लार कमलैः शतपत्रकैः |
जातीचंपकपुन्नाग वकुळैः करवीरकैः || 18 ||

दूर्वाप्रवाळमालूर माचीमरुवपत्रकैः |
अकीटादिहतैर्नव्यैः कोमलैस्तुलसीदळैः || 19 ||

पावनैश्चंद्रकदळी कुसुमैर्नंदिवर्धनैः |
नवमालालिकाभिः मतल्लिकातल्लजैरपि || 20 ||

कुरंडैरपि शम्याकैः मंदारैरतिसुंदरैः |
अगर्हितैश्च बर्हिष्ठः पाटीदैः पारिजातकैः || 21 ||

आमोदकुसुमैरन्यैः पूजयामि जगत्पतिं |
धूपोऽयं गृह्यतां देव घ्राणेंद्रिय विमोहकं || 22 ||

सर्वांतरतमोहंत्रे गुह ते दीपमर्पये |
सद्यः समाभृतं दिव्यममृतं तृप्तिहेतुकं || 23 ||

साल्यान्नमद्भुतं नव्यं गोघृतं सूपसंगतं |
कदळीनारिकेळामृधान्याद्युर्वारुकादिभिः || 24 ||

रचितैर्हरितैर्दिव्य खचरीभिः सुपर्पटैः |
सर्वसंस्तारसंपूर्णैराज्यपक्वैरतिप्रियैः || 25 ||

रंभापनसकूश्मांडापूपा निष्पक्वमंतरैः |
विदारिका कारवेल्ल पटोली तगरोन्मुखैः || 26 ||

शाकैर्बहुविधैरन्यैः वटकैर्वटुसंस्कृतैः |
ससूपसारनिर्गम्य सरचीसुरसेन च || 27 ||

कूश्मांडखंडकलित तप्तक रसनेन च |
सुपक्वचित्रान्नशतैः लड्डुकेड्डुमकादिभिः || 28 ||

सुधाफलामृतस्यंदिमंडक क्षीरमंडकैः |
माषापूपगुलापूप गोधूमापूप शर्करैः || 29 ||

शशांककिरणोद्भासि पोळिका शष्कुळीमुखैः |
भक्ष्यैरन्यैः सुरुचिरैः पायसैश्च रसायनैः || 30 ||

लेह्यैरुच्चावचैः खंडशर्कराफाणितादिभिः |
गुडोदकैर्नारिकेळरसैरिक्षुरसैरपि || 31 ||

कूर्चिकाभिरनेकाभिः मंडिकाभिरुपस्कृतं |
कदळीचूतपनसगोस्तनी फलराशिभिः || 32 ||

नारंग शृंगबेरैल मरीचैर्लिकुचादिभिः |
उपदंशैः शरच्चंद्र गौरगोदधिसंगतं || 33 ||

जंबीररसकैसर्या हिंगुसैंधवनागरैः |
लसताजलदग्रेण पानीयेन समाश्रितं || 34 ||

हेमपात्रेषु सरसं सांगर्येण च कल्पितं |
नित्यतृप्त जगन्नाथ तारकारे सुरेश्वर || 35 ||

नैवेद्यं गृह्यतां देव कृपया भक्तवत्सल |
सर्वलोकैकवरद मृत्यो दुर्दैत्यरक्षसां || 36 ||

गंधोदकेन ते हस्तौ क्षाळयामि षडानन |
एलालवंगकर्पूर जातीफलसुगंधिलां || 37 ||

वीटीं सेवय सर्वेश चेटीकृत जगत्रय |
दत्तेर्नीराजयामि त्वां कर्पूरप्रभयानय || 38 ||

पुष्पांजलिं प्रदास्यामि स्वर्णपुष्पाक्षतैर्युतं |
छत्रेण चामरेणापि नृत्तगीतादिभिर्गुह || 39 ||

राजोपचारैरखिलैः संतुष्टो भव मत्प्रभो |
प्रदक्षिणं करोमि त्वां विश्वात्मक नमोऽस्तु ते || 40 ||

सहस्रकृत्वो रचये शिरसा तेऽभिवादनं |
अपराधसहस्राणि सहस्व करुणाकर || 41 ||

नमः सर्वांतरस्थाय नमः कैवल्यहेतवे |
श्रुतिशीर्षकगम्याय नमः शक्तिधराय ते || 42 ||

मयूरवाहनस्येदं मानसं च प्रपूजनं |
यः करोति सकृद्वापि गुहस्तस्य प्रसीदति || 43 ||

इति श्री सुब्रह्मण्य मानस पूजा |